ALIGARH ORIENTAL SERIES

General Editor

Umesh Chandra Sharma

No. 7

THE RĀJAMṚGĀṄKA OF BHOJARĀJA

DAVID PINGREE

VIVEKA PUBLICATIONS
ALIGARH

Aligarh Oriental Series, No. 7

The Rājamṛgāṅka of Bhojarāja

by David Pingree, Professor of History of Mathematics,
Brown University, Providence, RI 02912, USA.

First Published: 1987

Price in India Rs. ~~60~~ 80/=; abroad U. S. $ 12

Publishers:

VIVEKA PUBLICATIONS, 3/364, Samad Road,
ALIGARH-202001, U.P., India.

Printed at:
Chitra Printing Press, Parao Dubey, Aligarh-202001, U.P., India.

PREFACE

This edition of Bhojarāja's *Rājamṛgāṅka* is the first in a planned series of publications of rare Sanskrit astronomical texts that I intend to edit in the course of next several years. They will be prepared in roughly the chronological order of their compositions so that their interrelationships and borrowings from each other may be explored as the series advances. An index of *pāda*-s and one of parameters will complete the series, which should provide, in conjunction of those more familiar texts that have already been published, firmer basis than is now available for studying the development of astronomy in India between *ca.* 1000 and 1800 A.D. The next volume will contain the astronomical works of Bhojarāja's subject, Daśabala.

I am extremely grateful to Dr. U. C. Sharma for accepting this work for inclusion in the distinguished *Aligarh Oriental Series* and for his labours in preparing my manuscript for the printer. I also extend my thanks to Viveka Publications and to the Chitra Printing Press for the excellent job they have done in producing this volume.

David Pingree

TABLE OF CONTENTS

Introduction 1

Rājamṛgāṅka of Bhojarāja

1. Madhyamādhikāra 4
2. Spaṣṭīkaraṇādhikāra 6
3. Tripraśnādhikāra 11
4. Udayāstādhikāra 16
5. Sṛṅgonnatyadhikāra 24
6. Candragrahaṇādhikāra 25
7. Sūryagrahaṇādhikāra 30
8. Grahayutyadhikāra 35

Appendix

Other Versions 43

Tables 57

Errata 69

DAVID PINGREE

THE RĀJAMṚGĀṄKA OF BHOJARĀJA

After the *Khaṇḍakhādyaka* that Brahmagupta composed in 665,[1] one of the earliest karaṇas[2] that we have is that of which an edition is presented here, the *Rājamṛgāṅka* ascribed to the Paramāra monarch of Dhārā, Bhojarāja.[3] The epoch of this karaṇa fell in the Śaka year 964 (I.3); the mean longitudes at epoch (dhruvas) given for the planets (I.10-12; *cf.* the table on f. 6 of manuscript B and in the bhoga-tables on ff. 1-10v of pt. II of manuscript B and on ff. 1-7 of pt. I of manuscript E) prove that the epoch date was 23 February 1042; see the table following the description of the bhoga-tables.

The present edition of the *Rājamṛgāṅka* is based on seven manuscripts. Two of these contain a version in eight adhyāyas that I have presented here as a base-text; each of the other five manuscripts contains a version in two adhyāyas, but each has a text that, while sharing some verses with the base-text and with the other, shorter versions, has those verses in its own order and augments them with verses from elsewhere. It is at present impossible, therefore, to determine exactly what Bhojarāja (or the author who wrote in his name) actually said. Not even the citations of the *Rājamṛgāṅka*, as far as they have been identified, help very much. I have chosen the method of describing each of the five short manuscripts separately, indicating when it shares material with the base-text or one of the other manuscripts (any variants it contains are added in parentheses) and editing each one's extra verses as they occur. I hope to be able to publish a series of karaṇas and their commentaries over the next few years so that eventually one may be able to sort out the origins of many of these verses, and perhaps also determine which originated with the *Rājamṛgāṅka*. When this project is completed will be the proper time for providing an astronomical commentary for the whole.[4]

1. D. Pingree, *Census of the Exact Sciences in Sanskrit* (hereafter *CESS*), Series A, vols. 1-4, Philadelphia 1971-1981; A 4, 256a-257a.
2. D. Pingree, *Jyotiḥśāstra*, Wiesbaden 1981, pp. 32-40.
3. *CESS* A 4, 337a.
4. For a detailed description of the techniques involved, see D. Pingree, "History of Mathematical Astronomy in India," in *Dictionary of Scientific Biography*, vol. 15, New York 1978, pp. 533-633.

It was first noted by K. S. Shukla[5] that the verses cited from the *Rājamṛgāṅka* by Āmarāja[6] in the commentary that he composed on the *Khaṇḍakhādyaka* in about 1200[7] are not found, by and large, in the text of manuscript D.[8] The verses cited by Āmarāja are as follows.

(1) On *Khaṇḍakhādyaka* I.16 (p. 34):

तथा च राजमृगाङ्के ।

धनर्णगैः सहस्रांशोः फलाल्लङ्कोदयासुभिः ।
हताद्राशिकलाप्तासुफलैः स्युः सूर्यवद्ग्रहाः ॥

(2) On *Khaṇḍakhādyaka* II.15-16 (p. 70):

यथा राजमृगाङ्के ।

त्रिभमन्त्यफलोपेतं पदमाद्यं द्वितीयकम् ।
चक्रार्धान्तं व्यन्त्यफलं नवभान्तं तृतीयकम् ॥
ततश्चतुर्थं चक्रान्तं पदानि प्रतिमण्डले ।

Quite different is *Rājamṛgāṅka* II.12.

(3) On *Khaṇḍakhādyaka* II. 25 (p. 75):

यथा च राजमृगाङ्ककरणे ।

स्पष्टमध्यमयोरैक्यं दलितं मध्यसंज्ञकम् ।
स्पष्टमध्ययुतेरर्धात् कार्यं मन्दफलं ग्रहे ॥ <१॥>
स्पष्टीकरणयोग्ये च तस्माच्छीघ्रफलं ततः ।
तत्रैव त्वेवमसकृदवशेषात् स्फुटग्रहाः ॥ <२॥>

1a-b=II.15a-b of manuscript B. With 1d compare *Rājamṛgāṅka* II.36d, with 2a compare *Rājamṛgāṅka* II.36c, and with 2b compare *Rājamṛgāṅka* II.37d and II.16c of manuscript B. With 2c-d compare *Rājamṛgāṅka* II 38a-b.

(4) On *Khaṇḍakhādyaka* III.11 (p. 107):

राजमृगाङ्के तु ।

बिम्बार्धेन समं यस्य याम्यक्रान्तिभवं धनुः ।
तस्मिन् मध्यदिनस्थेऽर्के या छाया विषुवत्यसौ ॥

However, Madanapāla[9] in the commentary that he wrote on adhyāyas 12-14 of the *Sūryasiddhānta* in the late fourteenth century correctly refers to the table of Sines with Radius equal to 1000 found

5. K. S. Shukla, "A Note on the Raja-mṛgāṅka of Bhoja Published by the Adyar Library," *Gaṇita* 5, 1954, 149-151.
6. *CESS* A 1, 50a-50b, and A 2, 15a-15b.
7. Edited by B. Miśra, Calcutta 1925.
8. Edited by K. M. K. Sarma, "The Rājamṛgāṅka of Bhoja," *Brahmavidyā* 4, 1940, 95-105.
9. *CESS* A 4, 350b-351a.

on ff. 11v-12 and repeated on ff. 12-12v of pt. II of manuscript B; this passage occurs on f. 30v of AS Bombay 294:

> अन्यैरपि राजमृगाङ्ककारादिभिर्या ज्या साधिता सापि त्रैराशिकेनैव तदपि प्रदृश्यते । यथा त्रिज्या ३४३८ एकांशज्या षष्टिः ६० । राजमृगाङ्के त्रिज्या कल्पिता [त्रिज्या] १००० । अनया <१०००> एकज्या <६०> गुणिता तया त्रिज्यया <३४३८> भागे <हृता> । लब्धं मृगाङ्कस्यैकांशज्या भवति ॥

Finally, the *Rājamṛgāṅka* is referred to by a number of authors. For its obscurity I cite only one reference, that given by Alaveśvara[10] in his *Jātakakalpavallī* (8,274 on f. 50v of AS Bombay 349):

> एवमिष्टां तिथिं भूयः स्पष्टयेत्तद्यथोच्यते ।
> स्पष्टाभ्यां चन्द्रसूर्याभ्यां मृगाङ्कोक्तप्रकारतः ॥

The two manuscripts of the base-text are here denoted F and G.

Manuscript F. Poona, Bhandarkar Oriental Research Institute 343 of 1879/80. Ff. 1-31. Copied on Tuesday 1 kṛṣnapakṣa of Śrāvaṇa in Saṃ. 1715, Śaka 1580 = 13 August 1658.

Manuscript G. Jodhpur, Rajasthan Oriental Research Institute 35107. Ff 1-9. Copied by Paṇḍita Jaitasī, the pupil of Jinacandra Sūrijī, at Vikramapura on Tuesday 11 śuklapakṣa of Phālguṇa in Saṃ. 1793, Śaka 1658 = 1 March 1737.

In the edition, which can not yet be regarded as definitive, I have respected the idiosyncretic text of these two manuscripts in so far as this is possible in an attempt to keep the six versions of the *Rājamṛgāṅka* uncontaminated by each other. I have also retained the manuscripts' lack of sandhi between pādas where this occurs. Akṣaras that I have added are enclosed in < >, those that I would delete in [ ]. Trivial errors of orthography are not reported in the apparatus.

In conclusion, I wish to thank the authorities of the Bhandarkar Oriental Research Institute, the Oriental Institute of Baroda, and the Rajasthan Oriental Research Institute for making their manuscripts available; and Professor Virendra Sharma of the University of Wisconsin, Fox Valley, in Menasha, Wisconsin, for procuring a film of manuscript G for my use.

---

10. *CESS* A 1, 47a.

राजमृगाङ्कः

< १. मध्यमाधिकारः >

श्रीगणेशाय नमः ॥

अर्कश्चन्द्रः कुजः सौम्यो जीवः शुक्रः शनिस्तमः ।
केतुर्ग्रहा नवाप्येते पान्तु वो दुरितच्छिदः ॥१॥

वासनासारसर्वस्वं निःपन्नं लघुकर्मवत् ।
ब्रूमो राजमृगाङ्काख्यं ज्योतिषां करणं स्फुटम् ॥२॥

शाको वेदर्तुनन्दोनो रविघ्नो माससंयुतः ।
अधो देवान्वितो द्विस्थस्त्रिवेदघ्नस्तयोर्हृतः ॥३॥

एकः खखेन्द्रैर्भाज्यो ऽन्यो वेदाष्टाग्निगजाब्धिभिः ।
फलैक्यमधिमासाः स्युस्तैरूर्ध्वस्थो युतो हृतः ॥४॥

खाग्निभिर्यातितिथियुक् पृथग् जिनयुतस्त्रिधा ।
वेदाङ्गैरयुतघ्नाक्षैर्गोभूतिथ्यब्धिसागरैः ॥५॥

पृथग्भक्तः फलैक्योनरात्र्यूनो द्युगणो द्वियुक् ।
सूर्यादिव्यस्तपातान्ता लङ्काम्ध्यार्यमोदयात् ॥६॥

एकैकादिमहाब्जान्तस्थानानां गतयः स्वकाः ।
स्वस्वसंख्यागुणा मिश्रा मध्याः स्युः सध्रुवा ग्रहाः ॥७॥

कल्पादिद्युगणो यद्वा करणाहर्गणान्वितः ।
नन्दाब्ध्यङ्कशराक्षाङ्कशराग्निरसखद्व्यगाः ॥८॥

विनापि ध्रुवकैरस्माज्जायन्ते मध्यमा ग्रहाः ।
सूर्याद्या व्यस्तपातान्ता लङ्कामध्यार्यमोदये ॥९॥

दिशो ऽष्टनेत्राणि शराब्धयः खं दिशो नव द्वौ गुणसायकाश्च ।
गजा दृशौ नन्ददृशो ऽद्रिसागरा द्विपा नृपा नाकसदः शरेन्दवः ॥१०॥

---

ben. श्रीभवानी जयतु F ॥ 2b युत्पन्नं G ॥ 4a खखेन्द्रैर्भाजयेदेको G ॥ 5a °तिथ्याढ्यः G । 5d °ब्धि° om. F ॥ 6a पृथक् पृथक् F । फलैक्यावम° G । 6b रात्र्योनो F । 6c-d °पातान्तर्लङ्का° G ॥ 8a-b om. F ॥ 9c °न्ता° om. F.

त्रयो नरेन्द्रा गगनं खवह्नयो रसा हया नेत्रशरा नवाग्नयः ।
रसा नखा वारिधयः कुवह्नयो नन्दास्त्रिचन्द्राः पृथिवी शरेषवः ॥११॥

बाणा दिशः शून्यगुणाः शराब्धयो दिवाकरादिध्रुवकाः क्रमादमी ।
राश्यादयस्ते कथितास्तु मध्याः पातः स च स्वध्रुवकाद्विशोध्यः ॥१२॥

गोक्षा नागा रवेरिन्दोः खाङ्कशैलाः शराग्नयः ।
कुरामाः षट्यमा भौमे ज्ञचले ऽक्षजिना रदाः ॥१३॥

पंचेज्ये ऽङ्गखगा नागा भृगोरार्कैः कलाद्वयम् ।
रसाः कुवेदास्तूच्चस्य भुक्तिस्तिस्रः शिवा व्यगोः ॥१४॥

नन्दात्यष्ट्यग्निसंयुक्तान् भजेत् खाभ्राभ्रभानुभिः ।
शाकाब्दादवशिष्टं तु भाजकाच्छेषमुत्सृजेत् ॥१५॥

तयोरल्पं त्रिगुणितं दशभक्तं विलिप्तिकाः ।
त्रिभिः शरैर्भुवा द्व्यक्षैर्बाणैस्तिथिभिरब्धिभिः ॥१६॥

द्वाभ्यां यमाभ्यां गुणिता बीजान्यर्कादिषु क्रमात् ।
स्वं ज्ञशीघ्रे धरासूनौ सूर्यपुत्रे परेष्वृणम् ॥१७॥

विषुवद्दिनमध्याह्ने द्वादशाङ्गुलशङ्कुजा ।
यत्प्रमाणा भवेच्छाया सा तत्र विषुवत्प्रभा ॥१८॥

छायावर्गाच्छङ्कुवर्गसंयुक्ताद्यत् पदं कृतम् ।
स स्वदेशे तु विज्ञेयः पलकर्णो ऽङ्गुलादिकः ॥१९॥

लङ्का कान्ती वत्सगुल्ममवन्ती गर्गराटकम् ।
स्थानेश्वरं सुमेरुश्च रेखेयं दक्षिणोत्तरा ॥२०॥

योजनैः पलकर्णघ्नै रेखास्वीयान्तरालगैः ।
भुक्तिः क्षुण्णा सहस्राप्ता ग्रहस्य विकलास्त्विह ॥२१॥

रेखायाः प्रागपरतः स्यातामृणधने क्रमात् ।
एवं कृते तु विज्ञेयः स्वदेशे मध्यमो ग्रहः ॥२२॥

इति श्रीराजमृगाङ्के मध्यमाधिकारः प्रथमः ॥१॥

13c कुमाराः G । 13d क्षचितिना F ॥ 14b कराद्वयं F ॥ 15c °देव G । 15d°षस्तु स्पजेत् G ॥ 17d परे ऋणं G ॥ 19a-b शंकुवर्गसंयुक्तात् om. G ॥ 19d ङ्गुलात्मकः G ॥ 21b रेखास्थाना° G ॥ col. इति राजमृगांकाये मध्यमग्रहाधिकारः प्रथमः F.

<२. स्पष्टीकरणाधिकारः>

द्वावश्वधात्यो ऽक्षशराः सुराश्च वेदा गजा वेददृशो ऽद्रिचन्द्राः ।
अश्वा महेन्द्रास्त्रिशराः शराक्षाः पंचाकृतिर्वह्निगुणा धृतिश्च ॥१॥

द्वाविन्दुदस्रास्तिथयः कुवेदा महीधरा हस्तिकरा नृपाः खम् ।
मन्दोच्चकानीन्दुविवर्जमेतान्यहस्करादेः करणादिकाले ॥२॥

मन्दोच्चमिन्दोर्ध्रुवके निरुक्तं मन्दोच्चबीजान्यथ संप्रवक्ष्ये ।
स्वस्वोच्चगत्या गुणयेद् गताब्दान् स्वोच्चेषु दद्यादयुतेन लब्धम् ॥३॥

चतुर्विंशतिराकाशं मनवो रसवह्नयः ।
राजानो रसरामाश्च यमवेदाः शराब्धयः ॥४॥

यमरामा नवगुणा यमलौ यमसागराः ।
संवत्सरायुतेनैषां गतयः स्युः कलादिकाः ॥५॥

स्वदेश्यो मध्यमः खेटो यातेनाथ चरेण च ।
भुजान्तरफलेन स्यात् कर्मयोग्यस्तु संस्कृतः ॥६॥

अतो मध्यमसूर्यस्य सर्वस्यांशा भवन्ति ये ।
तत्संख्यातुल्यकोष्ठस्थं द्यैक्यं नाड्यादि गृह्यते ॥७॥

द्यैक्यकोष्ठकनाडीभिर्भुक्तिः क्षण्णा खषड्हृता ।
फलं कलादिकं खेटे स्वमृणं स्यात् स्वचिह्नतः ॥८॥

कृते द्यैक्यस्य संस्कारे भवेत् कर्मत्रयं कृतम् ।
एवं कृते तु विज्ञेयः स्फुटीकारोचितो ग्रहः ॥९॥

स्फुटीकारोचितः सूर्यो ज्ञेयः सौम्यः सितश्च सः ।
स्फुटीकारोचितौ तौ द्वौ तयोः शीघ्रोच्चसंज्ञितौ ॥१०॥

भौमेज्यशनिशीघ्रोच्चं स्फुटीकारोचितो रविः ।
वक्ष्यमाणस्य केन्द्रादेर्भुजः साध्यो ऽथ तद्यथा ॥११॥

त्रिभाधिकं त्यजेत् षड्भ्यः षड्नं षड्गृहाधिकम् ।
नवाधिकं त्यजेच्चक्रात् शेषं भुज इहोच्यते ॥१२॥

1a सुराश्च— 1c त्रिशराः om. G ॥ 2a °विन्दुरस्य° F ॥ 6a स्त्रदेशो G ॥ 8b खषहद्हृताः F ॥ 10b सितस्य F ॥ 11c वक्षमाणस्य FG ॥ 11d भूजः G, कृतः F.

राशित्रयं भुजेनोनं शेषं स्यात् कोटिसंज्ञितम् ।
त्रिभिस्त्रिभिर्भैस्तु पदे केन्द्रे पदचतुष्टयम् ॥१३॥

भुजस्य कोटेर्वांशेभ्यो ज्यादियुक्त्या प्रसाधयेत् ।
स्फुटीकारोचितो भौमः शोध्यस्तादृग्विधा इव ॥१४॥

भौमस्य शीघ्रकेन्द्रं यद्दोःकोट्योर्यज्ज्यका लघुः ।
युगाहता नगैर्भक्ता केन्द्रे कर्किमृगादिके ॥१५॥

भौममन्दः कलाद्याप्तहीनयुक्तः स्फुटो भवेत् ।
अथवान्यप्रकारेण मन्दोच्चस्पष्ट उच्यते ॥१६॥

शीघ्रकेन्द्रं कुजे कृत्वा तत्पदाद् गतगम्ययोः ।
अल्पस्यांशा विधेयास्तु ततः साध्याः स्वकोष्ठकाः ॥१७॥

तेभ्यः संसाधितैरंशैर्मन्दोच्चं तु युतोनितम् ।
केन्द्रे मृगकुलीरादौ कुजस्यैवं स्फुटं भवेत् ॥१८॥

अथ स्पष्टीकृतिस्तत्र स्फुटीकारोचिते ग्रहे ।
मन्दोच्चवर्जिते तस्मिन् मन्दकेन्द्रं प्रजायते ॥१९॥

केन्द्राद् भुजं विधायाथ ततः साध्या भुजांशकाः ।
भुजांशसंमितः कोष्ठो ग्राह्यो मन्दफलस्य तु ॥२०॥

स भुक्तकोष्ठको ज्ञेयस्तदेष्यविवराहतम् ।
विकलं षष्टिसंभक्तं फलं गतफलान्वितम् ॥२१॥

एवं रव्यादिखेटानां भवेन्मन्दफलं स्फुटम् ।
खेचरे तदृणं केन्द्रे षड्ूने ऽभ्यधिके धनम् ॥२२॥

एवं रवीन्दू स्पष्टौ तौ भौमाद्याः स्युर्मृदुस्फुटाः ।
मन्दकेन्द्रभवा भुक्तिर्गतैष्यविवराहता ॥२३॥

षष्ट्या हृता पदवशात् क्षयस्वस्वक्षया गतौ ।
मन्दोच्चमिन्दोर्गतिमत् तद्भुक्त्या रहितैन्दवी ॥२४॥

15a-b यत् द्वो F ॥ 16d °तोच्यते FG ॥ 21a °कोष्टो F । विज्ञेय° FG । 21c विकलं G, विवरं F । 21d तत्फलं FG ॥ 23b भौमास्ता G ॥ after 23, G inserts a verse that breaks the connection between 23c-d and 24 a-b:-

अर्कमंदफलं भुक्तं षड्भिः स्वर्णं पलादिकं ।
चरं पलादि स्वर्णं तु + यास्वैव + विशेषतः ॥२४॥

मध्यभुक्तिर्मन्दकेन्द्रभवा भुक्तिर्भवेदिति ।
मन्दकेन्द्रगतिस्थाने मध्यां भुक्तिं प्रकल्पयेत् ॥२५॥

रव्यादीनां रवीन्द्वोस्तु भुक्तिरेवं स्फुटा भवेत् ।
मन्दस्फुटा कुजादीनां भुक्तिरेवं प्रजायते ॥२६॥

मन्दस्पष्टोनिते शीघ्रे शीघ्रकेन्द्रं प्रजायते ।
षड्भ्यो ऽधिकं द्वादशभ्यस्त्यक्त्वा कार्यास्ततो ऽशकाः ॥२७॥

तेभ्यस्ततो यथासन्नान् शीघ्रकोष्टांशकांस्त्यजेत् ।
संभवेंऽशं षष्टिगुणं कृत्वा योज्यं कलासु च ॥२८॥

भुक्तशुद्धांशकोष्ठस्तु तद्गतैष्यान्तराहतम् ।
कलाद्यं विकल्पं भक्तं द्विघ्नषष्ट्या फलान्वितम् ॥२९॥

गतकोष्ठफलं भोग्ये वृद्धे हीने तदूनितम् ।
एवं शीघ्रफलं स्पष्टं जायते तत् कलादिकम् ॥३०॥

धनर्णं तद्ग्रहे कार्यं केन्द्रे मेषतुलादिगे ।
मन्दस्पष्टां गतिं त्यक्त्वा शीघ्रभुक्तेस्ततो हताम् ॥३१॥

विवरेण कलाद्येन गतैष्यफलकोष्ठयोः ।
द्विघ्नषष्ट्या हृतां तावत् कार्यं भुक्तौ फलं धनम् ॥३२॥

भुक्तकोष्ठफलं यावत् भोग्याच्छुध्यति नो क्षयः ।
ऋणमभ्यधिकं भुक्तेस्तदा भुक्तिं ततस्त्यजेत् ॥३३॥

व्यस्तां भुनक्ति खचरो यच्छेषं प्रतिवासरम् ।
एवं तदा यदा वक्रा ग्रहभुक्तिः प्रजायते ॥३४॥

कृत्वा स्थाप्य स्फुटासन्नो भौमादिः स्वधिया ग्रहः ।
दलं मन्दफलस्यास्मात् स्फुटीकारोचिते कुजे ॥३५॥

तस्माच्छीघ्रफलस्यार्धं तस्मिन्नेव विधीयते ।
स्फुटीकरणयोग्ये च कुर्यान्मन्दफलं ततः ॥३६॥

तस्मिन्नेव ततः शीघ्रमित्यन्येषां फलं मृदु ।
स्फुटीकारोचिते कार्यं कुर्याच्छीघ्रफलं ततः ॥३७॥

27d तक्ता F ॥ 29d द्विघ्न° in margin G ॥ 31a तत् गृहे F ॥ 32c हृतां F ॥
33b भोग्यात् शुद्ध्ये ततो F ॥ 37a तदा F । 37b °त्यन्नेषां F.

तत्रैवेत्येवमसकृदविशेषात् स्फुटा ग्रहाः ।
एवमेव प्रजायन्ते गतयो ग्रहवत् स्फुटाः ।।३८।।

यद्वा स्पष्टीकृतिः कार्या बुधादीनां तु भौमवत् ।
तदनष्टतया धार्यं यत्केन्द्रं तुर्यकर्मणि ।।३९।।

तुर्यकेन्द्रभवां भुक्तिमनष्टान्तामपि न्यसेत् ।
ततश्च वक्रमार्गास्तोदयानपि विभावयेत् ।।४०।।

केन्द्राच्च शीघ्रफलवत् ग्रहकर्णान् प्रसाधयेत् ।
मन्दकेन्द्रभुजांशेभ्यो रवीन्द्वोः कर्णसाधनम् ।।४१।।

वस्वश्विभिः शरनखैः शक्रैस्त्र्यष्टेन्दुभिर्नखैः ।
दृश्याः प्राग्भच्युतैः पश्चाददृश्याः स्युर्लवैः कुजात् ।।४२।।

पश्चात् क्ववक्षैर्जिनैर्दृश्यौ ज्ञशुक्रौ प्राचि भच्युतैः ।
अदृश्यौ तौ परिज्ञेयौ भांशाः स्युः खरसाग्नयः ।।४३।।

त्र्यष्टिभिर्बाणमनुभिः शरार्कैर्विशिखाष्टिभिः ।
त्रीशैर्वक्रं कुजादीनामंशैः शीघ्रान्त्यकेन्द्रजैः ।।४४।।

तैश्च्युतैश्चक्रतः शिष्टैरनुवक्रं भवेदिह ।
ततो वक्रादिकेन्द्रस्य तुर्यकेन्द्रस्य चान्तरम् ।।४५।।

कलीकृत्य भवेत्तुर्यं केन्द्रभुक्त्या यदाप्यते ।
दिनादिसमयस्तेन वक्रादि स्याद् द्युसद्मनः ।।४६।।

स्वकेन्द्रादधिके तुर्यकेन्द्रे भाव्यन्यथा गतः ।
वक्रमार्गाविति स्पष्टौ स्थूलावस्तोदयौ तथा ।।४७।।

अर्कोनेन्दुकला भक्तास्तिथयो नखभूधरैः ।
गतगम्ये हते षष्ट्या नाड्यो भुक्त्यन्तरोद्धृते ।।४८।।

नक्षत्राण्यश्विन्यादीनि खाभ्रेभैर्ग्रहलिप्तिकाः ।
भक्ताः फलं स्वगत्याप्तं गतगम्यं दिनादिकम् ।।४९।।

रवीन्दुयोगलिप्ताः स्युर्योगाः खाभ्राष्टभाजिताः ।
विष्कुम्भाद्या दिनादि स्यात् भुक्त्यैक्ये गतगम्यतः ।।५०।।

38a तत्रैवमेवम° G ।। 39c तदनष्टचार्यं G ।। 40c-d ततश्चक्रमार्मास्तोदयनपि G ।। 42d कुलात् F ।। 43b प्राक् G । 43d भें ऽशा F, भोशा G ।। 44a °भुनिभिः F G । 44b विशेषा° F ।। 46a तुर्ये G ।। 47b भव्यन्व्यथा F ।। 50d भुक्त्येक्येनेते गम्यतः F.

करणानि बवादीनि चलानीन्दोः कला हृताः ।
व्यर्कस्याभ्राङ्गरामैश्च व्येकान्यन्यत्तिथेरिव ।।५१।।

शकुनिचतुष्पदनागान्यथ किंस्तुघ्नं ध्रुवाणि चरमार्धात् ।
कृष्णचतुर्दश्याः स्युः करणानि प्रतिपदाद्यर्धात् ।।५२।।

व्यब्धिवेदयुगाच्छाकात् षष्ट्याप्तमयनांशकाः ।
दातव्यास्ते चरे याते लग्ने दिक्क्रान्तिसाधने ।।५३।।

दिग्नागसत्र्यंशगुणैः क्रमाद् गुण्या पलप्रभा ।
स्वदेशचरखण्डानि तानि त्रीणि भवन्ति हि ।।५४।।

चरार्धं चरखण्डैः स्वैः स्पष्टं सायनसूर्यतः ।
भुजं कृत्वा भुजग्रहमिति योगात् प्रसाधयेत् ।।५५।।

भुजांशकादेर्भोग्यघ्नात् खरामाप्तयुता युतिः ।
चरार्धमेवं स्पष्टं स्यात् तत्षष्ट्या नाडिका भवेत् ।।५६।।

मेषादिगेऽर्के सौम्यः स्यात् गोलो याम्यस्तुलादिगे ।
मृगादिषट्कमयनमुत्तरं दक्षिणं परम् ।।५७।।

कुजान्विताश्चरपलैरुदग्गोले युतोनिताः ।
याम्ये ऽथ तिथिनाड्यस्ता रात्रिवासरयोर्दले ।।५८।।

रात्रेर्दलं द्विगुणितं रात्रिमानं स्फुटं भवेत् ।
द्विसंगुणं दिनदलं दिनमानं प्रजायते ।।५९।।

नन्दाङ्गाब्धियुजस्तष्टात् नखतत्त्वैर्द्युसंचयात् ।
सावनाब्दाधिपो ऽर्कादिः खत्वंग्न्याप्तं त्रिसङ्गुगम् ।।६०।।

सावनद्युगणात्तष्टात् दिग्यमैस्त्रिंशतार्जितम् ।
पतिः सावनमासस्य द्विघ्नं सप्तावशेषितम् ।।६१।।

चरदेशान्तरैक्यत्वे योगो ऽन्यत्वे तथान्तरम् ।
धनर्णगे ऽस्मिन् वारादिरध ऊर्ध्वमिनोदयात् ।।६२।।

53a °युगात् शाकात् G, °युगात् काशात् F । 53d दृक्कर्म° F, क्रान्ति° G ।। 55c °गृहृ° F । 55d योगाश्च° F ।। 56b °युता om. G ।। 57d पथं F ।। 58a जनान्विता° G । 58b °रुद्गोले F । 58c °स्तो FG ।। 59b प्रजायते F, स्फुटं भवेत् G ।। 61a शतोन° G, सन्तान° F । 61d °शेषकं F.

वारादेर्घटिका द्विघ्नाः पंचाप्ता दिवसाधिपात् ।
होरेशा रविशुक्रज्ञचन्द्रार्कीज्यकुजाः क्रमात् ॥६३॥

स्पष्टभानोर्यदंशादि भोग्यं तच्च कलीकृतम् ।
स्पष्टभुक्त्या दिनाद्येन फलेनार्कस्य संक्रमः ॥६४॥

अर्कवत् सर्वखेटानां राशिसंचरणे विधिः ।
गतगन्तव्यभदिनसाधनं स्पष्टचन्द्रवत् ॥६५॥

वक्रिते तु गतं गम्यं गम्यं ज्ञेयं तथा गतम् ।
भशेषं द्विशतीभक्तं शेषात् पादादिकल्पनात् ॥६६॥

स्फुटीकारोचितेजस्य भोग्यांशादि कलीकृतम् ।
मध्यभुक्त्या लब्धदिनैः प्रभवाद्यब्दसंक्रमः ॥६७॥

द्युभुक्तिः स्वेष्टनाड्यादिहता षष्टिविभाजिता ।
कलादिफलयुक् स्पष्टग्रहस्तात्कालिको भवेत् ॥६८॥

इति श्रीराजमृगाङ्के स्पष्टीकरणाधिकारो द्वितीय समाप्तः ।

<३. त्रिप्रश्नाधिकारः>

निरक्षे नवभान्यङ्कगोपक्षास्त्रियमाग्नयः ।
व्यस्ताश्च ते चरदले हीनाः पूर्वे ऽपरे युताः ॥१॥

व्यस्तैर्व्यस्ताः पुनस्ते स्युर्विनाडीभिः स्फुटोदयाः ।
स्वदेशजाश्च ते मेषतुलादेः स्युः क्रमोत्क्रमात् ॥२॥

स्पष्टस्य सायनांशस्य रवेर्भुक्तांशकादिकम् ।
त्रिंशतः शोधयेच्छेषं भोग्यमंशादिकं भवेत् ॥३॥

त्रिंशद्भक्ते ऽर्कभोग्यांशनिघ्ने सूर्याश्रितोदये ।
लब्धेनोनः पलचयः स्वेष्टश्चाथ तदग्रगैः ॥४॥

लग्नोदयैः संभवे ऽथ शुद्धं दद्याद्रवौ ततः ।
तच्छेषं त्रिंशता गुण्यमशुद्धोदयभाजितम् ॥५॥

65c °भविनं G ॥ 66d शेषाः पादादिकल्पना G ॥ 67a °स्य om. G ॥ col. स्पष्टीकारो G । समाप्तः om. G.

1a भवभाव्य° F ॥ 2b स्फुटोदयात् G ॥ 4a °भक्तेर्भोग्यां° F । 4d चेष्ट° G । तदग्रणो F ॥ 5a व्य° G । 5b दद्याद्ध्रवै G.

लब्धांशकादिकं शुद्धलग्नयुक्ते रवौ क्षिपेत् ।
शोधयेदयनांशांश्च लग्नमेवं स्फुटं भवेत् ॥६॥

स्वेष्टात् पलचयाल्लब्धं फलं यदि न शुध्यति ।
तदा तत् खगुणैर्गुण्यं निजोदयविभाजितम् ॥७॥

लब्धांशकाद्यन्वितोऽर्कस्तदा लग्नं स्फुटं हि तत् ।
लग्नं तात्कालिकाद् भानोर्निशि कर्म सषड्भतः ॥८॥

द्युलग्नकर्म कर्तव्यं निशा शेषविपर्ययात् ।
कालोऽसकृल्लग्नभुक्तरविभोग्यान्तरोदयैः ॥९॥

लग्नार्कयोरेकभत्वे तद्भागान्तरसङ्गुणात् ।
स्वोदयात् खगुणैर्लब्धमिष्टकालः स्फुटो भवेत् ॥१०॥

अधिके लग्नभागादावूर्ध्वं सूर्योदयात्तु सः ।
अधिके सूर्यभागादौ स कालो रात्रिशेषजः ॥११॥

दिनार्धं दिनपातोनं प्राक्कपाले नतं हि तत् ।
दिनार्धोने दिनगते नतं प्रत्यक्कपालजम् ॥१२॥

रात्रिशेषघटीयुक्ते दिनार्धे प्राक् नतं मतम् ।
प्रत्यक् नतं दिनार्धेऽथ रात्रियातघटीयुते ॥१३॥

नतोनितं दिनदलमुन्नतं तत् प्रकीर्तितम् ।
नतादथोन्नतात् षड्भिर्गुणिताज्ज्यादि साधयेत् ॥१४॥

त्रितयं चरखण्डानां द्विगुणं षष्टिभाजितम् ।
लब्धं त्रिंशद्युतं मानं ज्ञेयं परदिनस्य तत् ॥१५॥

घट्यः परमघस्रस्य रहिता दिननाडिभिः ।
मुनिघ्नाः पंचभिर्भक्ताश्छाया माध्याह्निकी भवेत् ॥१६॥

शङ्कोस्तात्कालिकी छाया कार्या शङ्क्वङ्गुलान्विता ।
मध्यच्छायोनया भाज्यं षड्गुणं दिनमानकम् ॥१७॥

लब्धं फलं नाडिकाद्यं प्राक् तद्दिनगतं भवेत् ।
ततोऽपरकपाले तु दिनशेषं हि तद् भवेत् ॥१८॥

6a लग्नां° F । 6b °भुक्ते G ॥ 9b शेषे G ॥ 11a अधिकं G, अधिक° F । °भागाद्याद्° G ॥ 12b प्राद्युपाले G ॥ 15d परमदिनस्य F ॥ 16d मध्या° G ॥ 17c °छायो तथा G.

दिनमानं विदिक् कृत्वा ततः कुर्यान्निवाहृतम् ।
तत्कालनतवर्गाप्तं विदिग्दिनशतांशयुक् ॥१९॥

विज्ञेयो गुणकः सो ऽथ व्येको हर इति स्मृतः ।
शङ्कुवर्गगुणं कुर्यादैक्यं गुणकहारयोः ॥२०॥

मध्यभागुणकाघातवर्गयुक्तं तु तद्वधेत् ।
साधयित्वाथ तन्मूलं हरेण विभजेत्ततः ॥२१॥

अङ्गुलाद्यत्र यल्लब्धं सेष्टच्छाया भवेत् स्फुटा ।
विषुवत्कर्णवद् भात इष्टकर्णं प्रसाधयेत् ॥२२॥

इष्टकर्णो ऽन्तरहृत इष्टमध्याह्नकर्णयोः ।
दिगूनद्युशतांशेन रहितो भाजको भवेत् ॥२३॥

दिनप्रमाणाद्रहितात् दिग्भिर्नवभिराहृतात् ।
भाजकेनाथ यल्लब्धं तत्पदं नतनाडिकाः ॥२४॥

ताश्च मध्याह्नतः शोध्या दिनार्धघट्यो गतागताः ।
इष्टच्छायेष्टकर्णाभ्यामेवं समयसाधनम् ॥२५॥

पलकर्णहृते त्रिज्ये शङ्कुनाथ पलत्विषा ।
हृते लम्बाक्षजीवे स्तः स्वाक्षो ऽक्षज्याधनुर्भवेत् ॥२६॥

ज्यां विशोध्य तदूर्ध्वस्थमंशं पृथगथ न्यसेत् ।
शेषात् षष्टिगुणाद् भोग्यज्याप्तं यच्च कलादिकम् ॥२७॥

तदंशाधः क्रमात् स्थाप्यमेवमंशादिकं धनुः ।
तच्च साध्यं क्रमज्याभिरुत्क्रमज्याभिरेव च ॥२८॥

अक्षांशाः सर्वदा याम्यास्तथैव विषुवत्प्रभा ।
लम्बज्या अथ लम्बांशा ज्ञेयाश्चोत्तरदिग्भवाः ॥२९॥

भूर्दन्तिनो नागशराः कुवह्नयः खमेकदस्राः ककुभो रसास्तथा ।
नेत्रे द्विनेत्राणि शशी नभोयमा भूर्नन्दयुग्मानि रसाब्धयः सुराः ॥३०॥

19b हर्ति F ॥ 21b तद्विधेत् F ॥ 22c °कर्णभात G ॥ 23a °हृत G ॥ 24a °प्रमाणान् F, ०प्रमाणं G ॥ 25b दिनघव्यो F, दिनर्द्धायो G । °गताः om. G ॥ 26c. धृते G । 26d स्वाक्षांश° G ॥ 29a-b जाम्यास्तथैव G, यास्ताप्येव F ॥ 30a °र्दन्ता F

त्रयस्त्रिचन्द्रा गिरिशा रसाश्विनः कुजादिपाताः स्युरिमे विलोमतः ।
सूर्याः शरोर्व्यो ऽङ्गयमा हुताशनास्त्रयो नवाब्धिः श्रुतयो ऽङ्कवह्नयः ॥३१॥

नन्दाश्विनो दस्रभुवश्च तेषां प्राग्वद्विलोमा गतयः कलाद्याः ।
कक्ष्याख्यवृत्ते खतुरङ्गदस्राश्चन्द्रस्य विक्षेपकलाः पराः स्युः ॥३२॥

खरुद्रा यमबाणोर्व्यो रसाङ्गाः षड्गुणेन्दवः ।
खरामचन्द्रा भौमादिविक्षेपाणां पराः कलाः ॥३३॥

पातोनचन्द्रदोर्जीवां र भैः संगुणयेत्ततः ।
चन्द्रकर्णेन यल्लब्धं स विक्षेपो निशापतेः ॥३४॥

पातोनचन्द्रस्य भुजात् भुजांशान् साधयेत्ततः ।
तदंशसंमितः कोष्टस्तदेष्यविवराहतम् ॥३५॥

विकलं षष्टिभक्तं तु फलं गतफलान्वितम् ।
एवं कृते वा यज्जातं स विक्षेपो निशापतेः ॥३६॥

भौमादीन् त्रिस्फुटान् खेटान् स्वस्वपातोनितान् लिखेत् ।
तेषां भुजान् विधायाथ भुजज्याश्च प्रसाधयेत् ॥३७॥

ताश्च जीवाः स्वविक्षेपकलाभिर्गुणयेदथ ।
प्राक्साधितैः स्वस्वकर्णैर्विभजेत्तदनन्तरम् ॥३८॥

लब्धं फलं कलाद्यं यत् स विक्षेपः स्फुटो भवेत् ।
भौमवाक्पतिसौराणामेवं विक्षेपसाधनम् ॥३९॥

यच्च मन्दफलं न्यस्तमनष्टं सितसौम्ययोः ।
तद्धनं चेदृणं कार्यं स्पष्टे स्वस्वचलोच्चके ॥४०॥

ऋणं चेत्तद्धनं कार्यं स्याच्चलोच्चमिति स्फुटम् ।
सितज्ञशीघ्रात् सुस्पष्टात् स्वस्वपातोनिताद् भुजम् ॥४१॥

कुर्यादथ भुजांशेभ्यः प्राग्वज्जीवाः प्रसाधयेत् ।
ताः स्वविक्षेपकलानिघ्नाः स्वस्वकर्णेन संभजेत् ॥४२॥

लब्धं फलं भवेत् क्षेपः कलाद्यः सितसौम्ययोः ।
पातोनग्रहगोलस्य वशतः शरदिग्भवेत् ॥४३॥

31d नवापि F ॥ 32a °भृवनश्च F ॥ 34b संगुये° ॥ 35c तदंत° G ॥ 36a षष्टि-संभक्तं सु F ॥ 39a कला [f. 10v] यत् F ॥ 40a व्यस्त° F ॥ 41c °शीघ्रस्पष्टात् G । 41d भुजात् G ॥ 42c स्वक्षेपकजानिघ्ना: G.

स्पष्टात्तात्कालिकात् खेटात् अयनांशयुतादथ ।
भुजं विधाय तदनु कर्तव्याश्च भुजांशकाः ॥४४॥

तेभ्यः कोष्ठांशकांस्त्यक्त्वा तद्गतैष्यान्तराहतम् ।
कलाद्यं विकलं भक्तं द्विघ्नषष्ट्या फलान्वितम् ॥४५॥

गतकोष्ठफलं भोग्ये वृद्धे हीने तदूनितम् ।
एवं कर्मणि यज्जातं सा स्फुटा क्रान्तिरुच्यते ॥४६॥

ग्रहगोलवशात्तासां क्रान्तीनां दिक् प्रजायते ।
पाताभावान्न विक्षेपो भास्वतश्चोपजायते ॥४७॥

अतः संसाधिता क्रान्तिर्यादृशी तादृशी स्फुटा ।
शरक्रान्त्योर्युतिः साम्ये दिग्भेदे वियुतिस्तु या ॥४८॥

एवं कृते भवेत् क्रान्तिः स्पष्टैव दिविचारिणाम् ।
चन्द्रादीनामिति प्रोक्तं क्रान्तिविक्षेपसाधनम् ॥४९॥

क्रान्त्यक्षांशैक्यमेकत्वे ऽन्यदिक्के ऽथान्तरे कृते ।
नतांशास्ते च नवतेः शुद्धाः शेषाः स्युरुन्नताः ॥५०॥

नगेशैर्गोष्टिभिर्वेदत्रिभिः शुद्धैः क्रमोत्क्रमात् ।
दिग्घ्नक्रान्त्यंशतो लब्धैश्चरखण्डैश्चरार्धकम् ॥५१॥

एवं साध्यं चरं चान्द्रं तद्दिक्क्रान्तिवशात् स्फुटम् ।
सायनांशाद् ग्रहात् स्पष्टात् रविवत् साधयेच्चरम् ॥५२॥

विक्षेपपलभाघातं सिद्धांशयुतहीनितम् ।
एकान्यदिक्के विक्षेपग्रहयोः स्यात् स्फुटं चरम् ॥५३॥

ततो दिनार्धं रात्र्यर्धं पूर्ववत् साधयेच्चरात् ।
एवं सर्वग्रहेन्द्राणां दिनमानं स्फुटं भवेत् ॥५४॥

उदयादस्तपर्यन्तं ग्रहस्य स्वदिनं भवेत् ।
अस्तादुदयपर्यन्तं स्याद्रात्रिर्व्योमसद्मनाम् ॥५५॥

45c कलाद्द्यं G ॥ 46a गतकोष्ट्यं F । भोगं G । 46d °हन्यते F ॥ 50d शुद्ध्या F॥ 52b स्फुटा FG । 52c °नांशान् ग्रहान् स्पष्टान् FG ॥ 53a °बलवानाद्यात G ॥ 54d °ट in marg. F ॥ 55a °तं om. F । 55d °सद्मन: F.

क्रान्त्यक्षैक्यान्तरं नम्रं तदूनमथ च त्रिभम् ।
तज्ज्याप्ते द्युदलार्कघ्ने नम्रत्रिज्ये प्रभाश्रुतिः ॥५६॥

ग्रहमाध्याह्निकौ छायाकर्णाविवं प्रसाध्य च ।
इष्टच्छायादिकं सर्वमुक्तयुक्त्या प्रसाधयेत् ॥५७॥

इति श्रीराजमृगाङ्के त्रिप्रश्नाधिकारस्तृतीयः ॥

< ४. उदयास्ताधिकारः >

रवेरूनो ऽल्पगः प्राच्यां दृश्यो ऽदृश्यश्च शीघ्रगः ।
शीघ्रगामी ग्रहः पश्चात् दृश्यो ऽदृश्यो ऽधिको ऽल्पगः ॥१॥

कार्यावौदयकौ सूर्यग्रहौ प्राच्यां यदोदये ।
अस्ते वा पश्चिमायां चेत् तदा द्वावस्तकालिकौ ॥२॥

मान्देन कर्मणा सूर्यं स्पष्टं भुक्तिसमन्वितम् ।
असकृत् कर्मणा स्पष्टं ग्रहं कुर्यात् सभुक्तिकम् ॥३॥

तदनु तु स्वपातेभ्यो विक्षेपं साधयेत् स्फुटम् ।
दक्षिणोत्तरता तस्य ज्ञेया गोलवशात्ततः ॥४॥

ग्रहदोर्ज्या जिनांशज्यागुणिता त्रिज्ययोद्धृता ।
यल्लब्धं सा यमज्येति सायनग्रहदिग्भवा ॥५॥

त्रिज्यावर्गात् क्रान्तिजीवावर्गहीनाच्च यत् पदम् ।
स्वाहोरात्रार्धविष्कम्भः सा द्युज्येति कथ्यते ॥६॥

मध्ये स्वगतितिथ्यंशे परमावनतेः कलाः ।
त्रिज्याहताः स्वकर्णाप्ता जायन्ते लम्बनस्य च ॥७॥

परलम्बनलिप्ताढ्यः त्रिज्याक्षश्रवणाहृतिः ।
द्युज्यकाप्तधनुः प्राणाः स्वर्णं स्युरुदयास्तयोः ॥८॥

क्रान्तिज्या सत्रिभा न्यस्ता क्षेपघ्नी त्रिज्यया हृता ।
क्रान्तिज्ये ऽथास्तयोरन्यैकादशयोरायनासवः ॥९॥

56b चित्रिभं G, च त्रिभिं F । 56c °कंस्ते F । 56d प्रसाधयेत् F ॥ 57b °कर्णावियं F ॥ col. स्तृतीयो ध्यायः संपूर्ण G.

1a कार्यौ after ल्पगः F । 1b दृश्य स्वशीघ्रगः G ॥ 2a सूर्यो F । 2b ययदोदयः G, न भोदयः F ॥ 3d स° om. G ॥ 4a तु om. G, स्त F ॥ 6b °वर्गजीवाच्च F । 6c-7b om. F ॥ 7a मध्यं G । तिथ्यंश G । 7c त्रिज्याहृता G, त्रिज्याघ्नस्वी F ॥ 9c ष्ठोस्तयो° F.

असुभ्यः षड्विभक्तेभ्यः पलानि स्युः पलैश्च तैः ।
स्वर्णगं यद्ग्रहाल्लग्नं स आयनखगो भवेत् ॥१०॥

इष्टकालग्रहात् क्रान्तिः कार्या विक्षेपसंस्कृता ।
सा स्पष्टक्रान्तिरस्या ज्या क्रान्तिज्येत्यभिधीयते ॥११॥

क्रान्तिज्या पलभानिघ्नी भक्तार्कैः स्यात् क्षितिज्यका ।
क्षितिज्या त्रिज्ययाभ्यस्ता स्वाक्षद्युज्याहृता फलम् ॥१२॥

यद्भवेत् सा चरज्येति तस्याश्चापकलास्तु याः ।
चरासवस्ते विक्षेपसंस्काररहिता तु या ॥१३॥

क्रान्तिस्तस्या उक्तवच्च साधनीयाश्चरासवः ।
स्फुटास्फुटक्रान्तिजयोश्चरयोरेकदिक्कयोः ॥१४॥

अन्तरं भिन्नदिक्के तु योगस्तत्राक्षजासवः ।
तत्पलैर्याम्यविक्षेपे धनाख्यं चोत्तरे ऽन्यथा ॥१५॥

आयनाख्याद्ग्रहाल्लग्नं तल्लग्नमुदयोद्भवम् ।
सषड्भादायनखगात् पलैरक्षोद्भवैः कृतम् ॥१६॥

सौम्यक्षेपे धनगतं योम्ये तस्मिन्नृणाभिधम् ।
यल्लग्नमस्तलग्नं तत् प्रस्फुटं तद्ग्रहस्य तत् ॥१७॥

अस्तलग्ने तु कर्तव्ये कार्यः षड्भाधिको रविः ।
लग्नमौदयिकं यच्च स ज्ञेयो दृग्ग्रहः स्फुटः ॥१८॥

रविदृग्ग्रहयोरल्पः कल्प्यो ऽर्कस्त्वपरस्तनुः ।
अर्कस्य भोग्याल्लग्नस्य भुक्ताश्चाथ समन्विताः ॥१९॥

मध्योदयैर्विनाड्यस्ताः साध्याः पश्चात् सषड्भयोः ।
एकभे त्वन्तरांशैश्च साध्याः प्राग्वद्विनाडिकाः ॥२०॥

तासु कालविनाडीभ्यो ऽधिकोनास्तु गतैष्यकः ।
उदयो ऽस्तमयश्चापि विज्ञातव्यो विपर्ययात् ॥२१॥

नवत्या विंशतिचयैः पलैरस्तोदयौ तथा ।
शुक्रेज्यज्ञार्किभौमानां नाडीभ्यामन्तरे विधोः ॥२२॥

11a इष्टः कालः GF ॥ 17a सौम्यविक्षेपे F ॥ 17d °स्य om. G ॥ 18c °मौदयं F ॥
19b कल्पो G ॥ 21b धिको तासु F ॥ 22a नवाश्वा G । 22d विधौ F

ज्ञभृग्वोर्वक्रिणोऽर्ज्वोर्दिक्पलोनयुतैः स्वकैः ।
मुनेर्नाडीद्वये न्यस्तो व्याधस्य दशभिः पलैः ॥२३॥

युतेन पलविंशत्या भानां समधिके भानोः ।
तात्कालिकविनाडीनां प्रोक्तानामपि चान्तरम् ॥२४॥

षड्गुणं विभजेद्भक्त्योरन्तरेणार्कखेटयोः ।
भुक्त्यैक्येनानृतौ तत् स्यात् गतगम्यदिनादिकम् ॥२५॥

यत्क्रान्तिर्दक्षिणा यावत् लम्बज्यातो ऽधिका भवेत् ।
स तावन् नोदयं याति सौम्या चेन्नास्तमश्नुते ॥२६॥

अतिसूक्ष्ममिदं प्रोक्तमुदयास्तनिरूपणम् ।
संप्रति व्यवहारार्थं स्थूलमप्यभिधीयते ॥२७॥

सायनांशान् ग्रहान् स्पष्टानयनं परिकल्प्य तु ।
ततो राशित्रयं दत्त्वा क्रमज्यामथ साधयेत् ॥२८॥

स्पष्टविक्षेपगुणितां क्रमज्यां विभजेत्ततः ।
सप्तेषुवेदयमलैर्लब्धं लिप्तादि यत् फलम् ॥२९॥

ऋणं क्षेपायनैकत्वे धनं भेदे भवेद्ग्रहे ।
विक्षेपे पलभाघ्ने ऽर्कभक्ते लिप्ता ऋणं धनम् ॥३०॥

प्राक् पश्चादुत्तरे क्षेपे याम्ये धनमृणं ग्रहे ।
प्रागस्ते प्राग्विधिर्ज्ञेयः पश्चाद्वत् पश्चिमोदये ॥३१॥

भवेदौदयिकं लग्नं ग्रहो दृक्कर्मसंस्कृतः ।
लग्नं रविश्च कर्तव्यौ प्रत्यक् षड्राशिसंयुतौ ॥३२॥

विनाडिकाः कालभवाः कालांशाः स्युर्दशोद्धृताः ।
अल्पो ग्रहार्कयोरर्को लग्नमन्यत्तदन्तरात् ॥३३॥

प्राग्वद्विनाड्यः षष्ट्याप्ताः कालांशाः षड्गुणाः स्मृताः ।
प्रोक्तेष्टकालांशकयोरन्तरं दशसंगुणम् ॥३४॥

23a ज्ञभृ° om. F ॥ 24b नतौ G ॥ 25a विभवे° G । 25c °नानृयौ G ॥ 26d चेन्नास्रमश्रुते G ॥ 28b °क° om. G । 28d °ज्यादथ G ॥ 29a स्पष्टां G ॥ 30b भेदं GF ॥ 31b गृहे GF ॥ 32a °दोदयकं F । 32b दर्कम° F । 32d प्रत्येक° F । °युतैः F ॥ 33d °त्तरंतरात् F

पुनर्गृहकलानिघ्नं ग्रहक्रान्त्योदयेन तु ।
भक्तं विभाजयेद्गत्योर्विवरेणार्कखेटयोः ॥३५॥

भुक्तियोगेन वक्रस्थे तत्फलेन दिना दिना ।
गतैष्य उदयो ऽस्तो वा विज्ञातव्यस्तु पूर्ववत् ॥३६॥

दृग्ग्रहः स्याद्यदा न्यूनः स्पष्टार्कोदयलग्नतः ।
राजन्यामुदयस्तस्य दिवसे ऽस्तमनं भवेत् ॥३७॥

अर्कास्तलग्नादूनो यस्तस्य स्यादुदयो दिवा ।
रात्रावस्तो ऽर्कलग्नाच्चेत् पुरतो दृग्ग्रहो भवेत् ॥३८॥

उदयो दिवसे तस्य रात्रावस्तमनं तदा ।
यो ऽर्कास्तलग्नात् पुरतो ऽस्तं दिवा निशि तज्जनुः ॥३९॥

नित्यास्तोदययोर्लग्नं सूर्यं कृत्वा तदन्तरे ।
प्राग्वत् कालः स एव स्यात् स्पष्टो ऽस्त उदये ऽपि च ॥४०॥

द्वौ भान्यथाभ्रमाकाशं राश्यादिर्ध्रुवको मुनेः ।
विक्षेपो ऽस्य तथा याम्यः पर्वतागांशकैर्मितः ॥४१॥

द्वौ षड्विंशतिराकाशं खं मृगव्याधजो ध्रुवः ।
राश्यादिस्तस्य विक्षेपो याम्यः खाब्ध्यंशकैर्मितः ॥४२॥

दिशः प्रकृतयो नागलोकाः करिमहार्णवाः ।
द्विरसाः सार्धगिर्यङ्गान्यक्षाङ्काः शरखेन्दवः ॥४३॥

सप्ताभ्रचन्द्रा नागाक्षिचन्द्राः श्रुतियुगेन्दवः ।
रूपेषुचन्द्राः पंचाद्रिचन्द्रा दस्राहिभूमयः ॥४४॥

सार्धेन्दुधृतयः क्ष्मैकदस्राः सिद्धाश्विनस्तथा ।
नागदस्राश्विनः शून्यसिद्धास्त्रिविशिखाश्विनः ॥४५॥

नन्दतत्त्वान्यगक्षाणि सार्धशून्यनवाश्विनः ।
नन्दैकलोकाः खसुराः श्रुतिवेदाग्नयो नभः ॥४६॥

ऋक्षाणामश्विनादीनां ध्रुवांशाः कथिताः क्रमात् ।
दिशो ऽर्काः सार्धचत्वारः सौम्याः सार्धाब्धयो दिशः ॥४७॥

36a °न om. G । 36d पूर्वक F ॥ 37a दग्ग्रहस्ताद्यदा F ॥ 38a अर्कालस्तालग्ना° F ॥ 43b परि° F ॥ 44b °चंद्रा नागाश्रुति° G ॥ 47c दिग्शाक्का: G

रुद्राश्च याम्याः सौम्याः षट् शून्यं याम्या नगा नभः ।
अर्का विश्व उदग्याम्या रुद्रा व्यंह्रिद्वयं लवाः ॥४८॥

सौम्याः सप्ताग्नयो याम्याः सत्र्यंशं व्यंह्रि च द्वयम् ।
सार्धाग्नयः सार्धनगाः सत्र्यंशविशिखाः शराः ॥४९॥

सौम्यास्त्रिंशद्रसगुणा याम्या धृतिकलानुगम् ।
सिद्धाः षड्विंशतिः सौम्याः शून्यं भक्षेपकांशकाः ॥५०॥

वह्निप्राजेशराधानामेकत्रित्रिकलान्विताः ।
षड्विंशें ऽशे ऽभिजित्त्वाप्ये द्वयङ्गान्यस्योत्तरः शरः ॥५१॥

पौष्णार्द्राप्यस्वातितिष्यचित्राः षट्कमिहैकभम् ।
द्विदैवताश्च दितिभं मूलं भद्रपदाद्वयम् ॥५२॥

फल्गुयुग्मं द्विनक्षत्रमष्टकं परिकीर्तितम् ।
याम्यं मृगशिरो ज्येष्ठा साभिजिच्छ्रवणं तथा ॥५३॥

पंचैतानि त्रिताराणि मैत्राषढाद्वयं त्रिकम् ।
चतुस्तारं तथान्यानि धनिष्ठा रोहिणी करः ॥५४॥

पंचताराणि षट्ताराः कृत्तिकाहिमघास्तथा ।
कलाचतुष्टयं मानं नक्षत्राणां गतिस्तु स्वम् ॥५५॥

ऋक्षे व्यवस्थिते द्वे द्वे मेषाद्ये चाश्वितात् क्रमात् ।
कुलीरे त्रीणि कीटे च चत्वारि च धनुर्धरे ॥५६॥

हुतभुग्ब्रह्महृदयौ वृषद्वाविंशभागगौ ।
अष्टाभिस्त्रिंशता चैव विक्षिप्तावुत्तरेण तौ ॥५७॥

पूर्वस्यां ब्रह्महृदयादंशकैः पंचभिः स्थितः ।
प्रजापतिर्वृषस्यान्ते सौम्ये ऽष्टात्रिंशदंशकैः ॥५८॥

अपां वत्सस्तु चित्राया उत्तरांशैश्च पंचभिः ।
बृहत् किंचिदतो भागैराप्यात् षड्भिस्तथोत्तरैः ॥५९॥

अपां वत्सस्य निकरे ऽभीष्टधीवक्त्रसंज्ञिता ।
उत्तरे तारका क्षिप्ता पंचांशैः सर्वपापहृत् ॥६०॥

48b नगाभः G ॥ 48c उदकयोम्यां G ॥ 50a °शत् सगुणा F ॥ 51a °प्रागेश° G । 51c ऽशे om. G । 51d °त्तरा F ॥ 52c दिविभ F ॥ 53a फल° G । 53b° मष्टमं G । 53c °शरो F ॥ 56d धमैघटे G ॥ 57d विक्षेपा° F ॥ 58b स्थितिः G ॥ 59d °स्तथोत्तैः F ॥ 60a निकरे G, भेदे F । 60b भेष्टधी° G, भष्टधी° F । °वक्त्रसंहिता G, वक्रसंज्ञिता F । 60c लिप्ता F । 60d °पापहितः F

श्रवणोत्तरयोर्मध्ये श्वेताभ्रमभिजित् स्मृता ।
सौम्यादित्यान्तरस्था या द्विपदगङ्गेति सा स्मृता ॥६१॥

आग्नेयस्योत्तरे भागे वृषबाणांशके शरे ।
त्रयोविंशे सायनांशे स्वामिकार्त्तिकसंस्थितिः ॥६२॥

फल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः ।
विशाखाग्निमसौम्यानां योगतारोत्तरा स्मृता ॥६३॥

पश्चिमोत्तरतारा या द्वितीया पश्चिमे स्थिता ।
हस्तस्य योगतारासौ श्रविष्ठायाश्च पश्चिमे ॥६४॥

ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा ।
भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा ॥६५॥

रोहिण्यदितिमूलानां प्राची सार्प्यस्य चैव हि ।
यथा प्रधानं शेषाणां स्थूला स्याद्योगतारका ॥६६॥

य एते ध्रुवकाः प्रोक्तास्तथा विक्षेपकाश्च ते ।
ज्ञेयास्ते योगताराया ध्रुवात् क्रान्त्यादिसाधनम् ॥६७॥

दृक्कर्माक्षजमेवैकं मुन्यादि ध्रुवके विधेत् ।
एवं विधं ध्रुवं तं तु परिकल्प्य रविं ततः ॥६८॥

स्वस्वकालविनाडीभिः कुर्याल्लग्नं धनर्णगम् ।
तत्तस्यौदयिकं लग्नं यल्लग्नं धनगं भवेत् ॥६९॥

सषड्भमृणगं लग्नमस्तलग्नं तु तस्य तत् ।
स्पष्टमौदयिकं सूर्यं विधाय स्वेष्टवासरे ॥७०॥

स्पष्टार्कस्योदयाख्यस्य विलग्नस्यान्तरेऽत्र याः ।
लिप्ताः स्युस्ताः स्पष्टसूर्यभुक्त्या संविभजेदथ ॥७१॥

फलेन दिवसाद्येन गतैष्य उदयो भवेत् ।
कृतादौदयिकाल्लग्नाद्रवावनधिकाधिके ॥७२॥

61c° र° om. F ॥ 63b °द्वंये G ॥ 65c °ण्याज्ञेय° F । °मित्राणां G । 65d खेत्याक्षो च दक्षिणे G ॥ 66d न्याद्यो° F, स्पाधो° G ॥ 68a दक्कमक्षिय°G ॥ 69c, 70c °दयकं F ॥ 71b त्रिया G ॥ 72a °साधेन G । 72b गतैष्टावुदयो F, गतेष्य उयो G । 72c °दयका° F

स्पष्टार्काद्रविलग्नाभ्यामेवमस्तं प्रसाधयेत् ।
नित्यास्तोदयं यः कुर्यात् ध्रुव दृक्कर्मसंस्कृतम् ।।७३।।

लग्नमौदयिकं तत् स्यात् सषड्भं चास्तलग्नकम् ।
दिनोदये दिनास्ते वा स्पष्टार्कादुक्तयुक्तितः ।।७४।।

ऊनस्य भोग्यमधिकं भुक्तं मध्योदयैर्युतम् ।
कुर्यात् स दृष्टसमय उदयादेः स्फुटो भवेत् ।।७५।।

मुन्याद्यस्तोदयावेवं प्रोक्तौ सिद्धान्तसंमतौ ।
संप्रति व्यवहाराय मुनेरस्तोदयौ ध्रुवे ।।७६।।

राशिद्वयं चतुष्कं च स्वाक्षेणोनं युतं क्रमात् ।
अस्तोदयौ सदा स्यातां तत्तुल्ये ऽर्के महामुनेः ।।७७।।

पंचर्तुसप्तसंयुक्ते शककाले शतोद्धृते ।
फलं सप्तर्षिभुक्तानि भानि तान्यश्विनीमुखात् ।।७८।।

अश्विभाद्यत्र नक्षत्रे मरीचाद्या महर्षयः ।
तत् पूर्वं यद्भवेद्धिष्ण्यं तत्र ज्ञेया ध्रुवस्थितिः ।।७९।।

वेदाद्रयो गणयमा द्व्यर्का नवसरिद्धराः ।
क्विन्द्रा भौमादिखेटानां वक्रे ज्ञेया दिनस्थितिः ।।८०।।

रसाभ्रतुरगा रामनन्दा नगनगश्विनः ।
पंचाग्न्यक्षा नगजिना स्तेषां मार्गे दिनस्थितिः ।।८१।।

चतुर्भिर्दिवसैर्मार्गादुदयश्चन्द्रजन्मनः ।
तावद्भिर्दिवसैर्वक्रात् पश्चादस्तमयो भवेत् ।।८२।।

षष्ट्यृतुभिर्नगगुणैर्द्व्यश्वरामैः कुजादयः ।
क्वक्षपक्षैर्द्व्यब्धिगुणैरुदयादस्तगामिनः ।।८३।।

गुणाग्निदिवसान् सौम्यो द्विसप्तदिवसान् सितः ।
प्रागस्ते तावद्दृष्टौ स्तः पश्चान्नृपदिशो दिवा ।।८४।।

शशिसूर्यैर्भूमिगुणैर्द्व्यब्धिभिर्दिवसैः क्रमात् ।
भौमवागीशशनयो ऽस्ताद्व्रजन्त्युदयं ततः ।।८५।।

73a °कास्तवि° G । 73c °दययो F, °दयः यौ G । 73d °संस्थितं G ।। 75a जनस्य F ।। 76b °संमितौ G ।। 80a °द्वया F ।। 82a पश्चातस्त° F, पश्चामप्त° G ।। 83d उदयाद्व्यस्त° F ।। 85d ऽस्मात् F

अमावास्यादिने ऽर्केन्दू कार्यावुदयकालिकौ ।
अतिस्पष्टौ ततश्चन्द्रे दृक्कर्मद्वयसंस्कृतिः ।।८६।।

कर्तव्यौदयिकं लग्नं तदेवेन्दोरतिस्फुटम् ।
स्पष्टार्काल्लग्नमूनं चेद्रात्रिशेषे विधूदयः ।।८७।।

तदा लग्नार्कतः साध्यः समयो घटिकादिकः ।
दर्शान्तं तेन संयुक्तं योगकाले स्फुटं भवेत् ।।८८।।

एवमर्कोदयादूर्ध्वं यदा चन्द्रोदयो भवेत् ।
तज्जातसमयेनोनं दर्शान्तं स्यात्तदा स्फुटम् ।।८९।।

पूर्णमास्यां दिनस्यान्ते लग्नमौदयिकं विधोः ।
सषड्भार्काद्यदा हीनं दिनशेषे तदोदयः ।।९०।।

तज्जातसमयेनोनं पौर्णमान्तं तदा स्फुटम् ।
रात्रौ चन्द्रोदये साध्यः समयः पूर्ववत् स्फुटः ।।९१।।

तिथ्यन्तं तेन संयुक्तं भवेदतिपरिस्फुटम् ।
कार्यः साध्यः शशी पूर्णादिने दृक्कर्मसंस्कृतः ।।९२।।

सषड्भार्कसमश्चन्द्रः सूर्यास्ते समुदेत्यसौ ।
अर्कोदये व्रजत्यस्तं तत्तुल्यः शशलांछनः ।।९३।।

वाजिपेयाश्वमेधादियागास्तिथ्यन्तकालिकाः ।
अनयैव दिनान्ते ऽपि साधनीया मखार्थिभिः ।।९४।।

शीघ्रकेन्द्रांशकैः स्थूलरीत्या लब्धैर्दिनैस्ततः ।
तदासन्नदिनस्पष्टैर्ग्रहैरस्तोदयौ विधेत् ।।९५।।

द्वितीयादिवसे स्पष्टौ सन्ध्यायामस्तकालिकौ ।
रवीन्दू चन्द्रपातश्च विक्षेपं साधयेत्ततः ।।९६।।

भवेदौदयिकं लग्नं चन्द्रो दृक्कर्मसंस्कृतः ।
अर्केन्दुभ्यां सषड्भाभ्यां प्राग्वत् साध्या विनाडिकाः ।।९७।।

इष्टकालांशकास्तेभ्यः प्रोक्तकालांशकक्रमात् ।
अस्तोदयपरिज्ञानमुक्तयुक्त्या प्रसाधयेत् ।।९८।।

86b °वुदायि° G ।। 87a °दयकं F । 87b °वेन्दुर° F ।। 88a तद्व° G । 88d योग° G ।।90b यदा before लग्न° F । °मौदकं F । विधौ F ।। 91a तेज्जातमनये° F ।। 92d °संस्थिते F ।। 94a यजे देया° F । 94c दिशाते F । 94d मखाब्धिभिः F ।। 95d °दयो G, °दयै F ।। 97a °दुदयकं F

अर्धरात्राधिका यत्र द्वितीया दृश्यते दिने ।
कर्कटादिगते चन्द्रे शशाङ्कोनैव दृश्यते ॥९९॥

तिथिघ्नं रजनीमानं द्वियुतोनं सितासिते ।
शुक्ले ऽस्तं स्याच्छरैकाप्तः कृष्णे चन्द्रोदयस्तथा ॥१००॥

इति श्रीराजमृगाङ्के उदयास्ताधिकारश्चतुर्थः ॥

< ५. शृङ्गोन्नत्यधिकारः >

सूर्याचन्द्रमसौ स्पष्टौ कुर्याच्छुक्ले ऽस्तकालिकौ ।
कृष्णपक्षे तथा तौ द्वौ कार्यावुदयकालिकौ ॥१॥

दृक्कर्मसंस्कृताच्चन्द्रात् क्रान्तिविक्षेपसंस्कृतात् ।
प्रत्यक् षड्राशियुक्तार्कक्रान्त्याढ्योना<त्>स्वदिग्वशात् ॥२॥

व्यर्केन्दुदोर्ज्यागुणितैः पलांशैस्त्रिज्ययोद्धृतैः ।
संस्कृताक्षवशाद्व्यर्कचन्द्रदोः कोटिराशिभिः ॥३॥

पंचघ्नैर्विहृताल्लब्धं वलनं त्वङ्गुलात्मकम् ।
ततो व्यर्केन्दुकोट्यंशान् विभजेन्मार्गणेशुभिः ॥४॥

यल्लब्धं तेन विभजेत् षड्गुणान् यदवाप्यते ।
तच्च स्थानद्वयन्यस्तं लब्धेनैकत्र संयुतम् ॥५॥

अर्धीकृतं स्वभाख्यं स्यात् लब्धेनोनं तथेतरत् ।
तदप्यर्धीकृतं सम्यक् ज्ञेयमत्र विभाह्वयम् ॥६॥

षडङ्गुलेन सूत्रेण वृत्तं कुर्याद्दिगङ्कितम् ।
वृत्ते ऽस्मिन् वलनं प्राच्यां शुक्लपक्षे यथादिशम् ॥७॥

प्रत्यग्दद्यात् कृष्णपक्षे केन्द्राच्च वलनाध्वनि ।
दद्याद्विभां विभाग्रे ऽथ स्वभया वृत्तमालिखेत् ॥८॥

प्राग्वृत्ते तेन वृत्तेन संस्थानं यादृशं भवेत् ।
तादृग्विधैव चन्द्रस्य ज्ञेया शृङ्गोन्नतिः स्फुटा ॥९॥

100c कृष्णे F । 100d शुक्ले F ॥ col. + संपूर्ण समाप्तं G

2c °त्य° om. G । 2d °क्रात्त्याद्योना F ॥ 7c पूर्वंवत लनं F ॥ 8a कृदमपक्षे G ।
8c स्य F

अक्षांशसंस्कृता कान्तिर्दिशि यस्यां व्यवस्थिता ।
चलनं तद्दिशि ज्ञेयं प्राचि सूर्योनषड्भयुक् ॥१०॥

उन्नतं दक्षिणं शृङ्गं धत्ते मेषे झषे शशी ।
उत्तरं शेषगः शृङ्गं वृषे कुम्भे समं द्वये ॥११॥

इति श्रीराजमृगाङ्के शृङ्गोन्नत्यधिकारः पंचमः ॥

<६. चन्द्रग्रहणाधिकारः>

द्युगणादभ्रसप्तर्तुस्वरविश्वसमन्वितात् ।
रूपबाणेषुखाभ्राब्धिनवभिर्गुणितादथ ॥१॥

तत्त्वाङ्गपंचाभ्रशरवह्निसिद्धैर्यदाप्यते ।
तत् खवेदाग्निसहितं दिनवृन्दे ऽथ निक्षिपेत् ॥२॥

विभजेत्तं खधृतिभिर्लब्धे सप्तविभाजिते ।
शेषाङ्कतुल्यो ब्रह्मादिः पर्वणामीश्वरो भवेत् ॥३॥

गते गम्ये ऽथ तिथ्यूने सम्भवश्चन्द्रपर्वणः ।
खाग्न्यूने गतगम्ये ऽथ सूर्यपर्वेन्दुपर्वणिः ॥४॥

पूर्णमास्यामतिस्पष्टौ चन्द्रार्कावस्तकालिकौ ।
कुर्यात्ताभ्यां च तिथ्यन्तं साध्यं साध्यं नतं ततः ॥५॥

नतज्या फललिप्ताघ्नी रवेः खाष्टरसैर्हृता ।
चन्द्रस्य रसखाङ्गैस्तत्फलं विकलिकाः पृथक् ॥६॥

रवेः स्युस्ता ऋणं स्वं च पूर्वापरकपालयोः ।
व्यस्तमिन्दोर्ऋणे केन्द्रे धने हानिः कपालयोः ॥७॥

ऋणस्वानि गतावोजयुग्मांह्रौ प्राक्कपालके ।
भानोर्विपर्ययः पश्चात् प्राक् स्वर्णर्णचया विधौ ॥८॥

11c °गः om. F । 11d द्वयं F ॥ after 11 G adds 6, 1c-2d ॥ col. शृंगात्यधि° G । + समाप्तः G

1b-2d follow 5, 11 in G, which has here:
खषट्घ्नात् षण्णवरविविभक्ताद्यदवाप्यते ।
रामतुं खेन्दुसहितं द्युवृन्दे तञ्च नि<ि>क्षपेत् ॥

1d °नवभि° om. G ॥ 6b °रसैं° in marg. F ॥ 6c-d °स्तः फले FG

द्युदलादधरात्रान्तं प्राक्कपालं हिमांशुजम् ।
अतो ऽपरकपालं तु विपरीतमिदं रवेः ॥९॥

चन्द्रार्काभ्यां नतफलसंस्कृताभ्यां पुनस्तिथिः ।
तिथ्यन्तं विदधीताथ ततस्तात्कालिकान् ग्रहान् ॥१०॥

चन्द्रार्कचन्द्रपाताख्यान् स्वस्वभुक्त्या प्रसाधयेत् ।
तथा रवीन्दुकर्णांश्च विदधीतोक्तवर्त्मना ॥११॥

नखतत्त्वाग्नयः खाभ्रखदन्ताः सूर्यचन्द्रयोः ।
निजकर्णेन भक्ताः स्युर्बिम्बमानस्य लिप्तिकाः ॥१२॥

खाश्वाश्विघ्नाद्विधोः कर्णात् रविकर्णहृतात् फलम् ।
त्यजेत् क्ष्माष्टार्थरूपेभ्यः शेषं क्षुण्णं निशापतेः ॥१३॥

बिम्बेन खाष्टवेदाप्तं भूछायामानलिप्तिकाः ।
छायेन्दू छादकच्छाद्यौ विज्ञेयौ चन्द्रपर्वणि ॥१४॥

तथैव छादकच्छाद्यौ चन्द्रार्कौ तु रविग्रहे ।
तात्कालिकेन्दुविक्षेपे मानैक्यार्धोनके ग्रहः ॥१५॥

मानैक्यार्धं स्फटशरहीनं छन्नमिह स्फुटम् ।
छन्ने छाद्याधिके पूर्णग्रहः खण्डग्रहो ऽन्यथा ॥१६॥

ततश्छादकमानार्धं छाद्यमानार्धसंयुतम् ।
विधाय साधयेद्वर्गं युक्तवर्गं युक्तवर्गः स उच्यते ॥१७॥

युक्तवर्गान्मध्यशरवर्गं संशोध्य तत्पदम् ।
षष्ट्या संगुण्य विभजेत् स्पष्टयोश्चन्द्रसूर्ययोः ॥१८॥

भुक्त्यन्तरेण तन्मध्यं स्थित्यर्धं घटिकादिकम् ।
वेदाब्धिचन्द्रैर्विभजेच्चन्द्रक्षेपमनन्तरम् ॥१९॥

लब्धेन घटिकाद्येन फलेनोनीकृतं ततः ।
स्थित्यर्धं तद्भवेत् स्पर्शः स्थित्यर्धं तत्फलाधिकम् ॥२०॥

स्थित्यर्धं मौक्षिकं ज्ञेयं विपातेन्दौ समांह्रिगे ।
तस्मिन् विषमपादस्थे तद्विपर्ययतो भवेत् ॥२१॥

9b °पाले G । 9d °त° om. F ॥ 12a-b खाभ्राभ्र° G । 12d °विषमान्तस्य F ॥
13c क्ष्मार्थर्थ° F । 13d कृष्णं F । °पतिः G ॥ 18c वि° om. G

एवं छादकमानार्धं छाद्यमानदलोनितम् ।
विधाय साधयेद्वर्गमूनवर्गः स उच्यते ॥२२॥

ऊनवर्गात् क्षेपवर्गहीनान्मूलं तु यद्भवेत् ।
तस्मात् षष्टिगुणादर्कचन्द्रभुक्त्यन्तरेण तु ॥२३॥

यत्फलं मध्यमर्दो ऽसौ विज्ञेयो घटिकादिकः ।
तस्यापि स्पर्शमोक्षत्वं प्राग्वत् क्षेपफलाद्भवेत् ॥२४॥

ऊर्ध्वमूर्ध्वेन गुणयेत्तेनैवाधः स्थितं तथा ।
विभज्य त्रिशताधः स्थं लब्धमूर्ध्वे विनिक्षिपेत् ॥२५॥

अवशेषं द्विगुणितमेवं वर्गः प्रसिध्यति ।
राशेरमूलदस्याथ मूलानयनमुच्यते ॥२६॥

उक्तवन्मूलमानीय तच्छेषं रूपसंयुतम् ।
षष्टिघ्नं विकलेनाढ्यं द्विगुणच्छेदभाजितम् ॥२७॥

यल्लब्धं तच्च मूलाधः स्थापयेत्तत् स्फुटं पदम् ।
वर्गस्तथा वर्गमूलमेवमत्र प्रसाधयेत् ॥२८॥

स्पर्शस्थित्यर्धरहिते तिथ्यन्तेन च संस्कृते ।
स्पर्शस्तथा मोक्षकालो मोक्षस्थित्यर्धसंयुते ॥२९॥

स्पर्शमर्देन रहिते तिथ्यन्ते ऽथ निमीलनम् ।
मोक्षमर्देन सहिते तस्मिन्नुन्मीलनं तथा ॥३०॥

नतसंस्कृततिथ्यन्ते मध्यग्रासं स्फुटं भवेत् ।
तस्मान्निमीलनं खण्डग्रहे चोन्मीलनं तथा ॥३१॥

स्पर्शादिकालिकाच्चन्द्रात् तत्तत्कालोत्थराहुणा ।
विक्षेपान् साधयेदुक्तयुक्त्या स्पर्शादिकालिकान् ॥३२॥

स्पर्शादिकालस्य नतं स्वभाघ्नं रविभिर्भजेत् ।
अङ्गुलात्मकमोक्षं प्राक् सौम्यं पश्चात्तु दक्षिणम् ॥३३॥

समौजपदगग्राह्यात् गतैष्यं यत् पदं भवेत् ।
द्विघ्नमङ्गुलपूर्वं तदायनं वलनं भवेत् ॥३४॥

22d °मूलवर्गः G ॥ 24d क्षयं F ॥ 25b यथा F । 25c °ताधस्तं F ॥ 26a अव:शेषं F ॥ 27c °नाड्यं G ॥ 29d °संस्थिते F ॥ 32b तत्का° F ॥ 34a °पदाग्राह्यात् F

अयनांशयुताद्ग्राह्यात् कुर्याद्वलनमायनम् ।
आक्षायनाख्यवलनैकत्वे योगो ऽन्यथान्तरम् ॥३५॥

एवं स्पर्शादिकालोत्थं वलनं पारमार्थिकम् ।
परमार्थे ऽपि दिग्वाच्या यच्छेषमवशिष्यते ॥३६॥

छाद्यच्छादकयोस्तुल्यातुल्यगत्योर्यदन्तरम् ।
योगस्तन्मध्यस्थित्यर्धगुणने षष्टिभाजिते ॥३७॥

लब्धं भवति लिप्ताग्रं ग्रहणे ग्रासमोक्षयोः ।
निमीलनोन्मीलनयोर्मध्यमर्ददले न च ॥३८॥

स्पर्शतो ऽनन्तरं स्वेष्टघटिकादि यदीप्सितम् ।
स्पर्शस्थित्यर्धतः शुद्धं वीष्टस्थित्यर्धमुच्यते ॥३९॥

भुक्त्यन्तरेण योगेन यद्वा प्राक्साधितेन तत् ।
गुणितं खरसैर्भक्तं लिप्ताग्रं वीष्टकालिकम् ॥४०॥

वीष्टस्थित्यर्धं लिप्ताग्रं मध्यस्थित्यर्धसंगुणम् ।
स्पर्शस्थित्यर्धसंभक्तं स्फुटं स्यात् परिलेखने ॥४१॥

मोक्षादर्वाक् च घट्यादि शुद्धं मोक्षस्थितेर्दलात् ।
तस्मात् साध्यं च लिप्ताग्रं मध्यस्थित्यर्धसंगुणम् ॥४२॥

मोक्षस्थित्यर्धसंभक्तं परिलेखे स्फुटं भवेत् ।
अत्र लिप्तात्मकान्येव जानीयादङ्गुलानि तु ॥४३॥

वृत्तं नृपाङ्गुलैः कुर्यात् दिक्चतुष्टयचिह्नितम् ।
प्राचीचिह्नाच्च वलनं ज्यावद्द्याद्यथादिशम् ॥४४॥

शरवच्च शरं दद्यात् वलनाग्रात् स्वदिङ्मुखम् ।
ग्रासमोक्षोत्थलिप्ताग्रप्रमाणं वलनान्ततः ॥४५॥

रेखां प्रसारयेत् प्राच्यां कुर्याच्चिह्नं तदग्रगम् ।
विक्षेपाग्रादथो वृत्तं ग्राह्यार्धेन स्फुटं लिखेत् ॥४६॥

ग्राहकार्धीयसूत्रेण वृत्तं लिप्ताग्रतो लिखेत् ।
वृत्तयोर्यत्र सम्पातस्तत्र स्पर्शं विनिर्दिशेत् ॥४७॥

42a °दर्वार्कं F, °दर्व्वार्क्क G ॥ 42c-43b om. F ॥ 43d च G ॥ 44c °चिह्नांक° G
46d ग्राद्यार्धेन F

प्रत्यक् तौ मौक्षिकौ वृत्ते दद्याद्वलनमार्गणौ ।
लिप्तोग्रप्रमितां रेखां प्रत्यक् च वलनाग्रतः ।।४८।।

ग्राह्यार्धवृत्तं क्षेपाग्रात् लिप्ताग्राद्ग्राहकार्धजम् ।
लिखेत्तद्वृत्तयोर्योगे या दिक् मोक्षस्ततो भवेत् ।।४६।।

प्राचीचिह्नाच्च वृत्ते ऽस्मिन् वलनं तन्निमीलजम् ।
ज्यावद्यथादिशं दद्यात् तदग्राच्च शरं तथा ।।५०।।

दत्त्वा यथादिशं पश्चात् प्राच्यां रेखां प्रसारयेत् ।
निमीलोन्मीललिप्ताग्रप्रमाणां वलनाग्रतः ।।५१।।

निमीलेष्वग्रतो वृत्तं ग्राह्यार्धेन स्फुटं लिखेत् ।
लिप्ताग्राद्ग्राहकार्धेन वृत्तयोर्यत्र संयुतिः ।।५२।।

तस्यां दिशि भवेच्चन्द्रबिम्बस्य च निमीलनम् ।
प्रत्यक्चिह्नात्ततो वृत्ते तदुन्मीलनकालजम् ।।५३।।

यथादिग्वलनं दद्यात् विक्षेपं च तदग्रतः ।
वलनाग्रात् स्वलिप्ताग्रमितां रेखां प्रसारयेत् ।।५४।।

प्रतीच्यां तच्छराग्राच्च वृत्तं ग्राह्यार्धजं लिखेत् ।
लिप्ताग्राद्ग्राहकार्धोत्थं तद्युज्युन्मीलनं भवेत् ।।५५।।

प्राचीचिह्नाच्च वृत्ते ऽथ वलनं मध्यकालजम् ।
दत्त्वा यथादिशं केन्द्रान्मध्येषुं वलनोन्मुखम् ।।५६।।

ग्राह्यार्धेन लिखेद्वृत्तं वलनाग्रादनन्तरम् ।
शराग्राद्ग्राहकार्धेनेत्येवं मध्यग्रहस्थितिः ।।५७।।

स्पर्शादूर्ध्वं स्पर्शवच्च मोक्षादर्वाक् च मोक्षवत् ।
वीष्टलिप्ताग्रयोगेन परिलेखः स्फुटो भवेत् ।।५८।।

वृत्तयोर्दिग्द्वयं व्याप्ता स्पर्शादिदिग् विनिश्चयः ।
यथा भवति तद्वच्मि शिष्यमोहापनुत्तये ।।५६।।

शशिनो याम्यविक्षेपे प्रग्रहः शूलिनो दिशि ।
मोक्षः समीरणदिशि नैर्ऋत्यां सकलग्रहः ।।६०।।

48d प्रकचलना° G ।। 50d यथा G ।। 51c निमीलनोन्मील° F ।। 55a तच्छाग्राच्च G ।। 56d वलनोद्भवं F ।। 58b मोत्तादर्वांच्च मोष्यवत् G । 58d परिलेष्य G ।। 59a दतयो G । व्याप्तौ G ।। 59b स्पर्शादेर्दिग् F ।। 60a °वेत्तेपे G । 60b °सुषिनो G । 60d नैहृत्यां F

शशिनः सौम्यविक्षपे स्पर्शः स्यादाशुशुक्षणेः ।
दिशि मोक्षस्तु वायव्यामैशान्यां सकलग्रहः ॥६१॥

अन्यथान्यदिशि स्यात्तद्विक्षेपस्य यदाल्पता ।
निमीलनोन्मीलने स्तो मोक्षस्पर्शदिशि क्रमात् ॥६२॥

स्वदिने सप्तभिर्भक्ते यल्लब्धं तत्प्रमाणतः ।
स्वांशसंख्या परिज्ञेया विदुषा स्वमनीषया ॥६३॥

आदावन्ते च धूम्रः स्यात् ग्रस्तार्धे मेचकच्छविः ।
शोणश्यामो दलाधिक्ये बभ्रुः सर्वग्रहे विधुः ॥६४॥

नृपांशकः शीतरश्मेः खण्डितो ऽपि न लक्ष्यते ।
स्वच्छत्वादतितैक्ष्ण्याच्च सवितुर्द्वादशांशकः ॥६५॥

इति श्रीराजमृगाङ्के चन्द्रग्रहणाधिकारः षष्ठः ॥

< ७. **सूर्यग्रहणाधिकारः** >

साध्यावौदयिकौ स्पष्टौ चन्द्रार्कौ रविपर्वणि ।
अमावास्यादिने ताभ्यां तिथ्यन्तं नतसंस्कृतम् ॥१॥

ततश्चन्द्रार्ककेन्द्राभ्यां रवीन्द्वोः श्रुतिसाधनम् ।
ततो बिम्बमिती साध्ये रवीन्द्वोरुक्तवर्त्मना ॥२॥

रवीन्दू चन्द्रपातश्च साध्यास्तिथ्यन्तकालिकाः ।
अमावास्यान्तनाडीभिः कुर्याल्लग्नं निजोदयैः ॥३॥

तिथ्यन्तकालिकार्कोनं तल्लग्नं पंचसंगुणम् ।
राशयो घटिका ज्ञेया द्विघ्नांशाश्चषकास्तथा ॥४॥

लम्बनद्युगतं तत्तु विज्ञेयं घटिकादिकम् ।
लम्बनद्युगतस्याथ स्वदिनार्धवशेन यत् ॥५॥

नतं तेनाथ रहिता गुणिता विंशतिस्ततः ।
लम्बनं तद्भवेद् द्विघ्नविषुवत्कर्णभाजितम् ॥६॥

61b °दीशुशुष्पणे: G ॥ 62b °द्विक्षेपस्यदाल्पता G । 62c °नोन्मील° in marg. G ॥ 63c खांश° FG ॥ 64b ग्रस्ताद्धौं F, ग्रस्ताद्धो G ॥ 65b लिक्षते G ॥ col. + समाप्तः G

1a साध्यादौदयको F ॥ 5c °गतः स्वाथ F । 5d तत् G ॥ 6d °भाजते G

दर्शान्ते तद्भवेत् स्वर्णं परपूर्वकपालयोः ।
लम्बनद्युगतात् शुद्धेः सा दिनार्धे नतं मतम् ॥७॥

प्रत्यक्कपाले पूर्वे ऽमादिनार्धाद् द्युगते गते ।
तिथिर्मध्यग्रहणिका संस्कृता लम्बनेन या ॥८॥

तस्याः स्वमध्याह्नवशात् यन्नतं घटिकादिकम् ।
तस्माच्च पंचभिर्लब्धं यद्राश्यादि फलं भवेत् ॥९॥

फलेन तेन हीनाढ्यः पूर्वापरकपालयोः ।
समलिप्तो रविः कार्यः सः खार्को भवति स्फुटः ॥१०॥

सायनांशात्ततः खार्कात् प्राग्वत् संसाधयेच्चरम् ।
तत् षड्गुणं पलभया विभजेद्यदवाप्यते ॥११॥

तेन स्वर्णंचरन्यायात् संस्कृता व्योमसायकाः ।
ऊना हताः पलभया द्विघ्नास्ते श्रुतिभाजिताः ॥१२॥

कलाद्यं यत्फलं लब्धं सा विज्ञेया स्फुटा नतिः ।
पलभायास्तु याम्यत्वात् नतिर्याम्यैव सर्वदा ॥१३॥

चन्द्रश्च चन्द्रपातश्च कार्यौ लम्बनकालिकौ ।
पातोनाच्च ततश्चन्द्रात् कार्यं विक्षेपसाधनम् ॥१४॥

विक्षेपस्य नतेश्चैकदिक्के योगो ऽन्यथान्तरम् ।
कर्तव्यमर्कग्रहणे भवत्येवं शरः स्फुटः ॥१५॥

रवीन्द्वोर्मानयोगार्धं शरोनं छत्रमुच्यते ।
तस्मिन् छाद्याधिके पूर्णग्रहः खण्डग्रहो ऽन्यथा ॥१६॥

छाद्यार्थयुक्छादकार्धवर्गान्मध्यशरस्य च ।
वर्गेण हीनाद्यन्मूलं तत् कुर्यात् षष्टिसंगुणम् ॥१७॥

भुक्त्यन्तरेण विभजेत् स्पष्टयोश्चन्द्रसूर्ययोः ।
यल्लब्धं तद्भवेन्मध्यस्थित्यर्धं घटिकादिकम् ॥१८॥

विभक्ताद्वेदमुनिभिश्चन्द्रक्षेपाद्यथागतात् ।
स्थित्यर्धं तत्फलोनाढ्यं विपातेन्दौ समांह्रिगे ॥१९॥

7d मा FG । यतं G ॥ 8a-b दिङ्मानाधात् G ॥ 8d वा G ॥ 10d संख्यार्को G ॥ 13c फलभाज्या° G ॥ 13d तनै° F ॥ 14c पातोन च G ॥ 15a विक्षेपश्च F । 15b °दिक् च F । 15c °व्यकर्मग्र° F ॥ 19c तत्फलेनानाद्यं F

तस्मिंश्च विषमांह्रिस्थे तत्फलाढ्योनितं हि तत् ।
स्पर्शस्थित्यर्धमाद्यं स्यात् अन्यन्मोक्षस्थितेर्दलम् ।।२०।।

स्पर्शस्थित्यर्धरहितात् दर्शान्तान्नतसंस्कृतात् ।
तात्कालिकेन रविणा लग्नं कुर्यादनन्तरम् ।।२१।।

तस्मात्तात्कालिकार्कोनात् लम्बनद्युगतादिकम् ।
विधाय लम्बनं साध्यं तत् कुर्यात् स्वर्णचिह्नितम् ।।२२।।

तत्संस्कृता नततिथिः स्पर्शस्थितिदलोनिता ।
ज्ञेया स्पर्शतिथिर्मोक्षस्थित्यर्धसहितात्ततः ।।२३।।

नतसंस्कृतदर्शान्तात् लग्नं तात्कालिकार्कतः ।
तात्कालार्कोनिताल्लग्नात् लम्बनद्युगतादिना ।।२४।।

लम्बनं साधयेत् प्राग्वत् चिह्नितं स्वर्णसंज्ञया ।
तत्संस्कृता नततिथिर्मोक्षस्थित्यर्धसंयुता ।।२५।।

भवेन्मोक्षतिथिः स्पष्टा तत्स्पर्शादिकालिकात् ।
चन्द्रात्तत्कालपातोनात् कार्यं विक्षेपसाधनम् ।।२६।।

ततस्तात्कालिकतिथेर्नतादाप्तेन भादिना ।
तात्कालिकः संस्कृतो ऽर्कः खार्कः साध्या नतिस्ततः ।।२७।।

शरनत्योर्युतिः साम्ये दिग्भेदे वियुतिः स्फुटः ।
शरः स्पर्शादिकाले स्यादर्कपर्वणि सर्वदा ।।२८।।

अन्तरं घटिकाद्यं यत् कालयोः स्पर्शमध्ययोः ।
स्फुटं स्पर्शस्थितिदलं यज्ज्ञेयं रविपर्वणि ।।२९।।

एवं घट्याद्यन्तरं यत् कालयोर्मध्यमोक्षयोः ।
मोक्षस्थितिदलं स्पष्टं सर्वग्रासे ततो रवेः ।।३०।।

छाद्यार्धोनच्छादकार्धकृतेः शरकृतेस्तथा ।
विवरस्य पदं खर्तुगुणं गत्यन्तरोद्धृतम् ।।३१।।

ज्ञेयं तन्मध्यमदर्धं घटिकादि परिस्फुटम् ।
चन्द्रक्षेपाब्धिमन्वंशसंस्कृतं पूर्ववच्च तत् ।।३२।।

20d °स्थितच्छलं G ।। 21c °न om. G ।। 23a न तिथि F ।। 25b चितं G । 25c न तिथि F ।। 30a दद्यादन्तरं F ।। 31b शरकृते° om. F ।। 32c °ब्धि° om. G

निमीलनोन्मीलनयोस्तच्च स्थितिदलं भवेत् ।
निमीलनस्थितिदलेनोनाद्दर्शान्ततस्ततः ॥३३॥

तात्कालिकार्कलग्नाभ्यां प्राग्वत् साध्यं तु लम्बनम् ।
नतसंस्कृतदर्शान्ततिथिर्लम्बनसंस्कृता ॥३४॥

निमीलनार्धरहिता स्यान्निमीलनकालिका ।
एवं दर्शान्ततश्चोन्मीलनस्थित्यर्धसंयुतात् ॥३५॥

तात्कालिकार्कलग्नाभ्यां लम्बनं साधयेत्ततः ।
नतसंस्कृतदर्शान्ततिथिस्तेनाथ संस्कृता ॥३६॥

उन्मीलनस्थितिदलेनाढ्योन्मीलनकालिका ।
तात्कालिकावनत्या च शरौ साध्यावतिस्फुटौ ॥३७॥

निमीलनोन्मीलनयोर्मध्यकाले नवान्तरम् ।
निमीलनोन्मीलनयोः स्थित्यर्धं तत् पृथक् पृथक् ॥३८॥

नतं स्पर्शादिकालोत्थं भागुणं रविभिर्भजेद् ।
आक्षङ्गुलपूर्वं तत् प्राक् पश्चात् सौम्यदक्षिणम् ॥३९॥

समौजपदगग्राह्यात् सायनांशात् पदं हि तत् ।
गतैष्यं द्विगुणं तच्चायनमङ्गुलपूर्वकम् ॥४०॥

योगान्तरं तयोस्तुल्यान्यदिक्के वलनं स्फुटम् ।
एवं स्पर्शादिकालानां वलनस्पष्टता भवेत् ॥४१॥

रवीन्द्वोर्गतिसंयोगो मध्यस्थित्यर्धसंगुणः ।
षष्ट्या विभक्तो लिप्ताग्रं ग्रासमोक्षभवं हि तत् ॥४२॥

निमीलनोन्मीलनयोर्मध्यमदार्धसंगुणात् ।
वीष्टस्थित्यर्धलिप्ताग्रं वीष्टस्थित्यर्धसङ्गुणः ॥४३॥

नृपांगुलमिते वृत्ते प्रतीचीचिह्नतस्ततः ।
यथादिग्वलनं दत्त्वा शरं दद्यात्तदग्रतः ॥४४॥

ग्रासमोक्षोत्थलिप्ताग्रमितां रेखां प्रसारयेत् ।
प्रतीच्यां वलनाग्राच्च चिह्नं कुर्यात्तदग्रगम् ॥४५॥

